प्रवेश सं० १८७९२     विषयः पुराणेतिहासम्     क्रम सं०

नाम निर्जलैकादशी ~~व्रतम्~~ माहात्म्यम् (ब्रह्मवैवर्ते)     ग्रन्थकार

पत्र सं० १-३.

श्लोक सं०     अक्षर सं० (पंक्तौ) ४२     पंक्ति सं० (पृष्ठे) १०

आकारः ९.७"×४.४"     लिपिः दे. ना.     आधारः का.

वि० विवरणम् पू०

14501

पी० एस० यू० पा०--७७ एम० सी० ई०--१९५९--५० ०००

ना. ३७८८

Indira Gandhi National
Centre for the Arts

तुल्यद्रव्यंनिंबपत्रं।कांपिल्ल सिंदूरकंघृतं।सर्वमेकीकृतंकुर्याद्भगंदरविनाशनं॥१॥

महीधरसंग्रहे-४८६

Indira Gandhi National
Centre for the Arts

ए.उ.भ. ॥श्रीगणेशाय नमः॥ भीम उवाच॥ ॥पितामह महाबुद्धे शृणु मे परमं वचः। युधिष्ठिरश्च कुंती च तथा द्रुपदनं
१ दिनी॥१॥ अर्जुनो नकुलश्चैव सहदेवस्तथैव च। एकादश्यां न भुंजंति कदाचिदपि सुव्रता॥२॥ ते मां ब्रुवंति
४२ वै नित्यं मा भुंक्ष्व त्वं वृकोदर। अहं तानब्रुवं तात बुभुक्षा दुःसहा मम॥३॥ दानं दास्यामि विधिवत्पूजयिष्यामि केशवं भीमसेन वचः श्रुत्वा व्यासो वचनमब्रवीत्॥४॥ व्यास उवाच॥ ॥यदि स्वर्गमभीष्टं ते नरकं दुष्टमेव च
॥एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि॥५॥ भीमसेन उवाच॥ पितामह महाबुद्धे कथयामि तवाग्रतः॥
एकभक्तेन शक्तोऽहं उपवासं कुतः प्रभो॥६॥ तथाप्यहं करिष्यामि कष्टेनैकादशीव्रतं। व्यास उवाच॥
उपवासासमर्थोऽपि एकामेकादशीं कुरु॥ वृषस्थे मिथुनस्थे वा यदा चैकादशी भवेत्। ज्येष्ठे मासि प्रयत्ने
न सोपोष्योदकवर्जिता॥७॥ तत्राचमने गण्डूषं चैव जपिलोदकं बुधः॥ उपभुंजीत नैवेह व्रतभंगोऽन्यथा भवे एम०
त्॥८॥ उदयादुदयं यावद्वर्जयित्वोदकं ततः। अयत्नात्समवाप्नोति द्वादशद्वादशीफलं॥९॥ ततः प्रभाते १
विमले द्वादश्यां स्नानमाचरेत। जलं सुवर्णं दत्वा तु द्विजातिभ्यो यथाविधि॥१०॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः
कृतं१

९१

सहितो वशी। एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत्॥११॥ संवत्सरे तु याश्चैव एकादश्यो भवंति चै॥१२॥ ता
सां फलमवाप्नोति अत्र मे नास्ति संशयः। इति मां केशवः प्राह शंखचक्रगदाधरः॥१३॥ सर्वान धर्मान परित्यज्य मा
मेकं शरणं व्रज। एकादश्यां निराहारस्ततः पापात्प्रमुच्यते॥१४॥ द्रव्यशुद्धिः कलौ नो ऽस्ति संस्कारः स्मार्त एव वा वै
दिकं च कुतश्चास्ति मामेदुष्टे कलौ युगे॥१५॥ किं तु ते बहुनोक्तेन वायुपुत्र पुनः पुनः एकादश्यां न भुंजी
त पक्षयोरुभयोरपि॥१६॥ एकादश्यां सितेपक्षे ज्येष्ठे मास्युदकं विना। पुण्यं फलमवाप्नोति यत्तच्छृणु वृह
कोदर॥१७॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलं। तत्फलं समवाप्नोति इमां कृत्वा वृकोदर॥१८॥ संव वा ५
त्सरे या पापाश्चतुः शुक्लाः कृष्णा वृकोदर। उपोषितास्तु ताः सर्वा एकादश्यो न संशयः ॥१९॥ धनधान्यवहा
श्चैव पुत्रारोग्य सुखप्रदा। उपोषिता नरव्याघ्र इति सत्यं ब्रवीमि ते॥२०॥ यमदूता महाकायाः कराला कृ
ष्णपिंगलाः दंडपाशधरा रौद्रा नोपसर्पंति तं नरं।२१। पीतांबरधराः सौम्याः चक्रहस्ता मनोजवाः अंत
काले नयंत्येवं चैवं वैष्णवाः वैष्णवीं पुरीं॥२२॥ तस्मात्सर्वप्रयत्नेन सोपोष्योदकवर्जिता। जलधेनुं तथा दत्वा सर्व

Indira Gandhi National
Centre for the Arts

ए·जे·मा पापैःप्रमुच्यते॥२३॥इतिश्रुत्वाततश्चक्रुःपांडवाजनमेजय।तथात्वमपिभूपालसोपवासोव्रतंहरेः॥२४॥कुरुस
२ र्वप्रयत्नेनसर्वपापप्रशांतये।त्वयंतुनियमंकृत्वाद्वादशान्तोपिवा॥२५॥भुंक्ष्येपरेह्निदेवेशसत्रंवायामसरापरान।
५० रत्नमुत्पापंततोमंत्रउपवासपरोभवेत्।२६॥सर्वपापविनिर्मुक्तःशुभपञ्चद्वादशीसमन्वितः।मेरुमंदरमात्रंतुपापंस्त्री
पुरुषस्यया॥२७॥सर्वतद्भस्मतांयातिएकादश्याःप्रभावतः॥२८॥नराःकुर्वंतियेदातुंजलधेनुंनराधिपास
कांचनःप्रदातव्योघटोवस्त्रेणसंवृतः॥२९॥तोयस्यनियमंयोस्यांकुरुतेवैसपुण्यभाक्।पलकोटिसुवर्णस्य
यामेयामेश्रुतंफलं॥३०॥स्नानंदानंतपंहोमंयदस्यांकुरुतेनृप।तत्सर्वंचाक्षयंप्रोक्तमेतत्कृष्णस्यभाषितं॥३१॥
किंचापरेणधर्मेणनिर्जलैकादशींनृप।उपोष्यचनरोभक्त्यावैष्णवंपदमाप्नुयात्॥३२॥सुवर्णमन्नवस्त्रंवायोयद
स्यांसंप्रदीयते।तदस्यैवसुरश्रेष्ठसर्वंचाप्यक्षयंभवेत्॥३३॥एकादशीदिनेयोन्नंभुंक्तेपापंसभुंजति॥इहलोके एक·
सचांडालोमृतःप्राप्नोतिदुर्गतिं॥३४॥येप्रदास्यंतिदानानिद्वादश्यांसमुपोषिताः।ज्येष्ठमासिसितेपक्षेमया २
तिपरमंपदं॥३५॥ब्रह्महामद्यपस्तेनोजगानद्वेषासदानृतीमुच्यंतेपातकैःसर्वैःद्वादशीसमुपोषणात्॥३६॥

विशेषंशृणुकौंतेयनिर्जलैकादशीदिने।यत्कर्तव्यंनरैःस्त्रीभिःश्रद्धादमसमन्वितैः॥३७॥जलशायीतुसं
पूज्योदेयाधेनुस्तथानघ।प्रत्यक्षागथवाधेनुस्तथापिवा॥३८॥दक्षिणाभिःसुपुष्टाभिर्मिष्टान्नैश्चपृथ
ग्विधैः।तोषणीयःप्रयत्नेनद्विजोधर्मभृतांवर॥३९॥तुष्टोभवतिवैक्षिप्रंतेनतुष्टोमोक्षदोहरिः॥आत्मद्रोहःकृ
तस्तैर्हियैरेषानासमुपोषिता॥४०॥पापात्मानोदुराचारामुच्यंतेनात्रसंशयः।कुलानांचशतंसाग्रमनागतम
तंसदा॥४१॥आत्मनासहतेनीतंवासुदेवस्यमंदिरं।शांतैर्दांतैर्दानपरैःरचयिद्भिस्तथाहरिं॥४२॥कुर्वद्भिर्जा
गरंरात्रौयैरेषासमुपोषिता।अन्नंपानंतथागावोवस्त्रंशय्यासनंशुभं॥४३॥कमंडलुंतथाछत्रंदातव्यंनिर्ज
लादिने।उपानहौचयोदद्यात्पात्रभूतेद्विजोत्तमे॥४४॥सभौतोस्वर्गगोलोकेनात्रकार्याविचारणा॥४५॥
यःफलंसंनिहसायांराहुग्रस्तेदिवाकरे।कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याःश्रवणादपि॥४६॥नियमंचप्रकुर्वी
तदंतधावनपूर्वकं।एकादश्यांनिराहारोवर्जयिष्यामिवैजलं॥४७॥केशवप्रीणनार्थायअन्यदाचमना
द्दिनाः।द्वादश्यांदेवदेवेशपूजनीयस्त्रिविक्रमः॥४८॥गंधैःपुष्पैर्धूपदीपैर्वासोभिःप्रियदर्शनैः।पूजयि

Indira Gandhi National Centre for the Arts

ए·त्रे·शु· त्वाविधानेनमंत्रमेतदुदीरयेत॥४९॥देवदेवहृषीकेशसंसारार्णवतारक।उदकुंभप्रदानेनप्रयच्छपरमांगति
३ म॥५०॥ततःकुंभाप्रदातव्याब्राह्मणानांचशक्तितः।सान्नवस्त्रयुताभीमवस्त्रोपानद्युताचिताः॥५१॥
५१ दानानिचात्रदेयानिजलधेनुर्विशेषतः।भोजयित्वाततोविप्रान्स्वयंभुंजीतवाग्यतः॥५२॥एवंयःकु
रुतेपूर्णांद्वादशीपापनाशिनीं।सर्वपापविनिर्मुक्तःपदंगच्छत्यनामयं॥५३॥ततःप्रभृतिभीमेनकृताह्ये
कादशीशुभा।पांडवद्वादशीनाम्नालोकेख्यातावभूवह॥५४॥इतिश्रीब्रह्मवैवर्तपुराणेनिर्जलाव्र
तंसमाप्तं॥ ॥शुभमस्तु॥ ॥छ छ॥ ॥छ ॥ ३

Indira Gandhi National Centre for the Arts